## १० दशम दशकः - शक्ति प्रदानम्

ततो विमाना दज विष्णु रुद्राः त्वद्गोपुर द्वार्यवरुह्य सद्यः ।
स्त्रियः कृता देवि तवेच्छयैव सविस्मया स्त्वन्निकटं समीयुः ॥ १०-१॥

कृत प्रणामा स्तव पादयुग्म नखेषु विश्वं प्रतिबिम्बितं ते ।
विलोक्य साश्चर्य ममोघ वाग्भिः पृथक्पृथक् तुष्टुवु रम्बिके त्वाम् ॥ १०-२॥

नुति प्रसन्ना निजसर्ग शक्तिं महासरस्व त्यभिधा मजाय ।
रक्षार्थ शक्तिं हरये महालक्ष्मि आख्यां च लीला निरते ददाथ ॥ १०-३॥

गौरीं महाकाल्यभिधां च दत्वा संहार शक्तिं गिरिशाय मातः ।
नवाक्षरं मन्त्र मुदीरयन्ती बद्धाञ्जलीं स्तान् स्मित पूर्वमात्थ ॥ १०-४॥

ब्रह्मन् हरे रुद्र मदीय शक्ति त्रयेण दत्तेन सुखं भवन्तः ।
ब्रह्माण्ड सर्ग स्थिति संहृतीश्च कुर्वन्तु मे शासनया विनीताः ॥ १०-५॥

मान्या भवद्भिः खलु शक्तयो मे स्याच्छक्ति हीनं सकलं विनिन्द्यम् ।
स्मरेत मां सन्ततमेव मुक्त्वा प्रस्थापयामासिथ तां स्त्रिमूर्तीन् ॥ १०-६॥

नत्वा त्रयस्ते भवतीं निवृत्ताः पुंस्त्वं गता आरुरुहु र्विमानम् ।
सद्यस्तिरोधाः स सुधासमुद्रो द्वीपो विमानश्च तिरो बभूवुः ॥ १०-७॥

एकार्णवे पङ्कज सन्निधौ च हतासुरे ते खलु तस्थिवांसः ।
दृष्टं नु सत्यं किमु बुद्धिमोहः स्वप्नो नु किं वेति च न व्यजानन् ॥ १०-८॥

ततस्त्रयस्ते खलु सत्यलोक वैकुण्ठ कैलास कृताधिवासाः ।
ब्रह्माण्ड सृष्ट्यादिषु दत्तचित्ताः त्वां सर्वशक्ता मभजन्त देवि ॥ १०-९॥

सुधासमुद्रं तरलो र्मिमालं स्थानं मणिद्वीप मनोपमं ते ।
मञ्चे निषण्णां भवतीं च चित्ते पश्यानि ते देवि नमः प्रसीद ॥ १०-१०॥